# શ્રીલક્ષ્મીહયગ્રીવમઙ્ગલમ્

Shri Lakshmihayagrivamangalam

sanskritdocuments.org

May 13, 2018

# Shri Lakshmihayagrivamangalam

# શ્રીલક્ષ્મીહયગ્રીવમઙ્ગલમ્

## Sanskrit Document Information

Text title : lakShmIhayagrIvamangalam

File name : lakShmIhayagrIvamangalam.itx

Category : devii, mangala, lakShmI, vishhnu

Location : doc_devii

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 13, 2018

*sanskritdocuments.org*

# શ્રીલક્ષ્મીહયગ્રીવમઙ્ગલમ્

અશેષવેદરૂપાય યથાર્થજ્ઞાનદાયિને ।
વિદ્યાલક્ષ્મીસમેતાય વાજિવક્ત્રાય મઙ્ગલમ્ ॥ ૧॥

પાલને જ્ઞાનદાને ચ પ્રવણાદનિરુદ્ધતઃ ।
આવિર્ભૂતાય વેધોઽર્થમશ્વગ્રીવાય મઙ્ગલમ્ ॥ ૨॥

સ્વનાભિપદ્મજાયાદૌ સ્વોપદિષ્ટાઃ શ્રુતીઃ સમાઃ ।
સ્થિરં પુનરદાદ્યોઽસ્મૈ તુરઙ્ગાસ્યાય મઙ્ગલમ્ ॥ ૩॥

મધ્વાભાન્મધુમબ્બિન્દોઃ કૈટભં કઠિનાદપિ ।
કૃત્વાઽરી શિક્ષિતાજાય ગન્ધર્વાસ્યાય મઙ્ગલમ્ ॥ ૪॥

પાદવ્યવસ્થા યત્રાર્થવશેનૈવ મૃગાત્મને ।
યજુષે યજ્ઞરૂપાય હયગ્રીવાય મઙ્ગલમ્ ॥ ૫॥

યદુદ્ગીથસ્વરત્રસ્તૌ દૈત્યૌ વેદાપહારિણૌ ।
પ્રણવોદ્ગીથરૂપાય પુણ્યહ્રેષાય મઙ્ગલમ્ ॥ ૬॥

વામપુસ્તકહસ્તસ્વભુજાશ્લિષ્ટરમાત્મને ।
વ્યાખ્યામુદ્રાન્યહસ્તાય વાજિવક્ત્રાય મઙ્ગલમ્ ॥ ૭॥

શરદ્ઘનસ્થચન્દ્રાય પુણ્ડરીકસ્થમૂર્તયે ।
શઙ્ખચક્રધરાયાસ્તુ સૈન્ધવાસ્યાય મઙ્ગલમ્ ॥ ૮॥

જ્ઞાનામૃતઘટીયન્ત્રસાક્ષચિન્મુદ્રપાણયે ।
મુમુક્ષાહેતુવીક્ષાય મધુહન્ત્રેઽસ્તુ મઙ્ગલમ્ ॥ ૯॥

યસ્યાક્ષરસમામ્નાયો હ્યકારાદિર્હલન્ત્યવાક્ ।
મધ્યે હયવરશ્લિષ્ટો હયાસ્યસ્યાસ્ય મઙ્ગલમ્ ॥ ૧૦॥

અશ્વિદધ્યઙ્યાજ્ઞવલ્ક્યકશ્યપાદિશ્રિતાઙ્ઘ્રયે ।
વૈષ્ણવક્રતુનેષ્ટાય વાજિવક્ત્રાય મઙ્ગલમ્ ॥ ૧૧॥

રજોમૂર્તેર્વધૂં વાણીં કુર્વતે સત્ત્વહેતવે ।
તમોમૂર્તિઞ્ચ સર્વજ્ઞં તુરગાસ્યાય મઙ્ગલમ્ ॥ ૧૨॥

રામદેશિતમાર્ગેણ પાઞ્ચાલેનાર્ચિતાઙ્ઘ્રયે ।
વ્યાસાદિજપ્યમન્ત્રાય વાજિકણ્ઠાય મઙ્ગલમ્ ॥ ૧૩॥

સર્વસૂક્ષ્માર્થવિજ્ઞાનં સાધુવ્યાહારધોરણી ।
યન્મન્ત્રજપતસ્તસ્મૈ હયગ્રીવાય મઙ્ગલમ્ ॥ ૧૪॥

દશાવતારા યસ્ય સ્યુઃ પાશ્ચાત્યાઃ વેધસાં ગુરોઃ ।
હવ્યકવ્યભુજે તસ્મૈ હયગ્રીવાય મઙ્ગલમ્ ॥ ૧૫॥

શ્રવણોદગ્રકર્ણાય શ્રવણર્ક્ષોદ્ભવાય ચ ।
શ્રવણગ્રાહ્યવાગ્દાત્રે શ્રીહયાસ્યાય મઙ્ગલમ્ ॥ ૧૬॥

યત્કટાક્ષકલાલેશકલનાત્સકલાઃ કલાઃ ।
સ્વયમાવિર્ભવન્ત્યસ્મૈ શીર્ષણ્યશ્વાય મઙ્ગલમ્ ॥ ૧૭॥

ધર્માવિરુદ્ધયોરર્થકામયોરમૃતસ્ય ચ ।
હેતું વાચં દદાનાય હયગ્રીવાય મઙ્ગલમ્ ॥ ૧૮॥

સર્વવિદ્યાપ્રતિષ્ઠાનબ્રહ્મવિદ્યાપ્રદાયિને ।
વાગીશ્વરેશ્વરાયાસ્તુ વાજિવક્ત્રાય મઙ્ગલમ્ ॥ ૧૯॥

જ્ઞાનાય જ્ઞાનરૂપાય જ્ઞાનિને જ્ઞાનદાયિને ।
સર્વોત્તમાય શ્રીશાય હયગ્રીવાય મઙ્ગલમ્ ॥ ૨૦॥

ય ઇદં શ્રીહયગ્રીવમઙ્ગલં નિયતં પઠેત્ ।
વિદ્યાવાગ્ધનવંશાયુર્વૃદ્ધિસૌખ્યાનિ સોઽશ્નુતે ॥ ૨૧॥

ઇતિ શ્રીલક્ષ્મીહયગ્રીવમઙ્ગલં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*Shri Lakshmihayagrivamangalam*
pdf was typeset on May 13, 2018

Please send corrections to *sanskrit@cheerful.com*